# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-6)** **प्रश्नपत्रम् – 8** गुणाः –70

विषयः – पुराणेतिहासः **कोड –C.E.3.6.12** समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –08/04/2019 सन्दर्भग्रन्थः – महाभारते शान्तिपर्वणि आपद्धर्मपर्व

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 कयोश्चित् द्वयोः व्याख्या कार्या। 10**

(1) असतां शीलमेतद् वै परिवादोऽथ पैशुनम्।
गुणानामेव वक्तारः सन्तः सत्सु नराधिपः॥

(2) अनागतविधाता च प्रत्युत्पन्नमतिश्च यः।
द्वावेव सुखमेधेते दीर्घसूत्रो विनश्यति॥

(3) न विश्वसेद् अविश्वस्ते विश्वस्ते नातिविश्वसेत्।
विश्वासाद् भयम् अभ्येति नापरीक्ष्य च विश्वसेत्॥

**प्रश्नः-2 एकं निबन्धात्मकोत्तरं लिखत। 10**

(1) मार्जारमूषकयोः आख्यानं तद्बोधश्च।

(2) ब्रह्मदत्तपूजनीसंवादः तद्बोधश्च।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 कयोश्चित् द्वयोः व्याख्या कार्या। 10**

(1) यो हि कश्चिद् द्विजं हन्याद् गां च लोकस्य मातरम्।
शरणागतं च यो हन्यात् तुल्यं तेषां च पातकम्॥

(2) यथाऽऽदित्यः प्रातरुद्यंस्तमः सर्वं व्यपोहति।
कल्याणमाचरन्नेवं सर्वपापं व्यपोहति॥

(3) न त्रासिनो न चपला न रौद्राः सत्पथे स्थिताः।
ते सेव्याः साधुभिर्नित्यं येष्वहिंसा प्रतिष्ठिता॥

**प्रश्नः-4 एकं निबन्धात्मकोत्तरं लिखत। 10**

(1) इन्द्रजनमेजयसंवादः।

(2) शाल्मलेः आख्यानं वर्णयित्वा तदुपदेशः निरूप्यः।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 कयोश्चित् द्वयोः व्याख्या कार्या।** **10**

(1) सत्यं धर्मस्तपो योगः सत्यं ब्रह्म सनातनम्।
सत्यं यज्ञः परः प्रीक्तः सर्वं सत्ये प्रतिष्ठितम्॥

(2) मित्रद्रोहो न कर्तव्यः पुरुषेण विशेषतः।
मित्रध्रुङ्नरकं घोरमनन्तं प्रतिपद्यते।

(3) धर्मो राजन् गुणः श्रेष्ठो मध्यमो ह्यर्थ उच्यते।
कामो यवीयानिति च प्रवदन्ति मनीषिणः॥

**प्रश्नः-6 एकं निबन्धात्मकोत्तरं लिखत।** **10**

(1) गौतमाख्यानेन कृतघ्नत्वनिन्दा।

(2) विविधानि पापानि तत्प्रायश्चितानि च।

## अन्वितयः १-३

**प्रश्नः-7 दशानां लघूत्तराणि लिखत।** **10**

(1) अपद्धर्मपर्वणि कति अध्यायाः विद्यन्ते?

(2) का सर्वथा न हन्तव्या-?

(3) दण्डविषये केन उपदिष्टम्?

(4) त्रेताद्वापरसन्धौ कतिवर्षपर्यन्तम् अनावृष्टिः अभूत्?

(5) कः पतिव्रतां प्रशंसति?

(6) विमानम् आस्थितः कपोतः कुत्र गतः?

(7) बालकस्य संजीवनाय केन वरदानम् प्रदत्तम्?

(8) सुरापः तत्पापात् केनोपायेन प्रमुच्यते?

(9) कौ समफलौ समदोषौ च?

(10) लोभात् प्रवर्तमानान् त्रीन् दोषान् लिखन्तु।

(11) सत्यं कतिविधम्?

(12) लोभः कथं निवर्तते?

(13) प्रहरणानां श्रेष्ठः कः?

(14) धर्मार्थकामविषये निर्णयः केन प्रदत्तः?

(15) अपद्धर्मपर्वणि मुख्यः वक्ता कः?